1054

॥अथवास्तुशांतिप्रारंभः॥
पत्र १०

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥ ॥अथवास्तुशांतिः।सायेषांसूत्रेनास्तितेषांभूद्रा
णांचकार्यातस्याःसर्वसाधारण्येनविधानात्।अतश्चनभूद्रमात्रविषयं॥त
स्मात्सूत्रोक्तापौराणोक्तयासमुच्चयितपौराणोक्तायाःप्रयोगः॥प्रागुक्तगृह
प्रवेशानासूर्वेद्युःशुभेपूर्वाह्णेसस्त्रीकःशुचिःप्राणानायम्यदेशकालौसंस्मृत्वा
गृहारंभादौअस्यवास्तोःशुभतासिध्यर्थंसनवग्रहमखांवास्तुशांतिंकरिष्ये
इतिसंकल्प्य।तदंगत्वेनगणेशपूजनपूर्वकंस्वस्तिपुण्याहवाचनंमातृकापू
जनंनांदीश्राद्धंआचार्यादिवर्णनंचकरिष्येइतिसंकल्प्यतानिकृत्वाआचार्यो १

दीन्वस्त्रादिभिःसंपूजयेत्॥ततऋत्विजश्चत्वारः॥ततआचार्यःयजमानश्च
तोहंआचार्यकर्मकरिष्येइतिसंकल्प्यगोरसर्षपान्विकिरेदेभिर्मंत्रैः॥यदत्र
संस्थितंभूतं०।अपक्रामंतुभूतानि०॥भूतप्रेतपिशाचाद्याअपक्रामंतु
राक्षसाः॥स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमामिति॥ततोगायत्र्या
दिभिरश्लितैःपंचगव्यैःशुचीद्रव्येतिअग्निःशुचिरितिवचनेनचसर्वंगृहा
दिप्रोक्षयेत्॥ततोगृहादौयजमानेकहस्तमितंचतुरस्रंसयोनिंत्रिमेखलं
कुंडंचतुरंगुलोच्छ्रितंस्थंडिलंवाविधायएतत्सर्वतश्चतुरंगुलोन्नतंहस्तमि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२

तंवेदिहृयंमृदाविधायउत्तरवेदोईशान्यादिदिक्कोणचतुष्केचतुरःशंकून्
ॐविश्वंतुभूतलेनागालोकपालाश्चसर्वतः॥अस्मिन्गृहेवतिष्ठंतुआयुर्बल
कराःसदेतिमंत्रेणरोपयेत्॥प्रतिरोपणंमंत्रावृत्तिः॥एवमग्रेपितोरोपणक्रमे
णशंकुपार्श्वेभक्तबलीन्दद्यात्॥ॐअग्निभ्योथसर्पेभ्योयेचान्येतत्समाश्रि
ताः॥तेभ्योबलिंप्रयछामिपुण्यमोदनमुत्तमं॥ततोवेद्युपरिवस्त्रेकुंकुमादिना
सुवर्णरजतादिशलाकया॥शंखा१यशोवती२कांता३विशाला४प्राणवाहिनी५
सती६सुमती७नंदा८सुभद्रा९सुरथा१०इतिप्रणवादिनमोंतैर्नामभिःपश्चादा २

रंभाःप्रागंताउदक्संस्थाःसमाअंगुलिद्वयांतरादशरेखाःकृत्वा॥पुनः॥॥॥
हिरण्या१सुव्रता२लक्ष्मी३विभूति४विमला५प्रिया६जया७ज्वाला८विशो
का९इडा१०इतिनामभिस्तथैवदक्षिणारंभाउदगंताःप्राक्संस्थाःदशरेखाःकृ
त्वाकुंडेस्थंडिलेवाभुवंसंस्कृत्याग्निंप्रतिष्ठाप्यदक्षिणवेद्यांवस्त्रेनवग्रहादीन्सं
स्थाप्यषोडशोपचारैःसंपूज्यनदीग्राम्यांकलशंसंस्थाप्यवास्तुमंडलंगत्वातत्र
ईशानकोणपदादारभ्यप्रतिमासुतंडुलपुंजेषुवाग्निरव्यादिदेवताःप्रणवा
दिनमोंतनाममंत्रैरावाहयेत्॥तत्रईशानकोणपदेवास्तोःशिरसि॥ॐ

३ शिखिनेनमः शिखिनंआवाहयामीतिस्थापयेत्॥१॥एवमग्रेपि॥तद्दक्षि
णेकपदेदक्षिणनेत्रेपर्जन्यं॰॥२॥तद्दक्षिणपदेतत्पश्चिमपदेचदक्षिणश्रो
त्रेजयंतं॰॥३॥तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधं॰॥४॥तद्दक्षिण
पदद्वयेदक्षिणबाहौसूर्यं॰॥५॥तद्दक्षिणपदद्वयेदक्षिण बाहौसत्यं॰॥६॥ वेव
तद्दक्षिणपदद्वयेदक्षिणकूर्परेभृशं॰॥७॥तद्दक्षिणेपरिस्थितेकपदे
दक्षि णप्रबाहौआकाशं॰॥८॥तद्दक्षिणाग्नेयकोणपदेदक्षिणप्रबाहौ
वायुं॰॥९॥त त्पश्चिमैकपदेदक्षिणमणिबंधेपूषणं॰॥१०॥तत्पश्चिम ३

पदेतदुत्तरपदेचदक्षिणपार्श्वेवितथं॰॥११॥तत्पश्चिमपदद्वयेदक्षिण
पार्श्वेग्रहक्षतं॰॥१२॥तत्पश्चिमपदद्वयेदक्षिणोरोयमं॰॥१३॥तत्पश्चिमप
दद्वयेदक्षिणजानोगंधर्वं॰॥१४॥तत्पश्चिमपदद्वयेदक्षिणजंघायांभृंगरा
जं॰॥१५॥तत्पश्चिमोपरिस्थेकपदेदक्षिणास्फिचिमृगं॰॥१६॥तत्पश्चिमे
नैर्ऋत्यको णपदेपादयोःपितॄन्॰॥१७॥तदुत्तरेकपदेवामस्फिचिदौवा
रिकं॰॥१८॥तदुत्तरपदेतत्पाक्यपदेचवामजंघायांसुग्रीवं॰॥१९॥तदुत्तरप
दद्वयेवामजानोपुष्पदंतं॰॥२०॥तदुत्तरपदद्वयेवामोरोवरुणं॰॥२१॥तदुत्त

रपदद्वयेवामपार्श्वेअसुरं०॥२२॥तदुत्तरपदद्वयेवा मपार्श्वेशोषं०॥२३॥
तदुत्तरोपरिस्थेकपदेवाममणिबंधेपापं०॥२४॥तदुत्तरवायव्यकोणपदे
वामप्रबाहोरोगं०॥२५॥तस्यागेकपदेवामप्रबाहोअहिं०॥२६॥तस्याग्यपदे
तदक्षिणपदेचवामकूर्परेमुख्यं०॥२७॥तस्याग्यपदद्वयेवामबाहोभल्लाट
कं०॥२८॥तस्याग्यपदद्वयेवामबाहोसोमं०॥२९॥तस्याग्यपदद्वयेवामांसेस
र्पं०॥३०॥तस्याग्यपदद्वयेवामश्रोत्रेअदितिं०॥३१॥तस्याकउपरिस्थेकपदे
वामनेत्रेदितिं०॥३२॥तदक्षिणेऽग्निखिपदाधःकोणपदेमुखेआपं०॥३३॥ ४

मध्यपदेषोशान३

आग्नेयेवायुपदाधःकोणपदेदक्षिणहस्तेसावित्रं०॥३४॥नैर्ऋत्येपितृप
दाधःकोणपदेमेंद्रजयं०॥३५॥वायव्येरोगपदाधःकोणपदेवामहस्तेरु
द्रं०॥३६॥कोणपदाद्दक्षिणपदत्रयेदक्षिणस्तनेऽर्यमणं०॥३७॥तदक्षिणा
ग्नेयेचैककोणपदेदक्षिणहस्तेसवितारं०॥३८॥तस्यश्चिमपदत्रयेजठरद
क्षिणभागेविवस्वंतं०॥३९॥तस्यश्चिम नैर्ऋत्यकोणपदेवृषणयोर्विबुधा
धिपं०॥४०॥तदुत्तरपदत्रयेजठरवामभागेमित्रं०॥४१॥तदुत्तरवायव्यको
णपदेवामहस्तेराजयक्ष्माणं०॥४२॥तस्याग्यपदत्रयेवामहस्तेपृथ्वीधरं०॥४३॥

तत्प्रागीशानकोणपदेऽग्रेसिआपवत्सं०॥४४॥मध्येनवपदेपुरुन्नाभ्येब्रह्माणं०॥४५॥तदुत्तरेवृषवास्तुंवास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्वास्तोष्पत्यावाहनेविनियोगः॥ॐवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः॥यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे॥इतिमंत्रेणास्थापयेत्॥सचसुवर्णस्यरौप्यस्यवा॥ततोमंडलस्यबहिरेशानाग्नेयनैर्ऋत्यवायव्येषुक्रमेणचरकीविदारीपूतनापापराक्षसी॥ततःपूर्वादिदिक्षुस्कंदअर्यमणंजृंभकंपिलिपिछंप्राग्वन्नाममंत्रैःसं ५

स्थाप्यपूर्वाद्यष्टदिक्षुइंद्रादीनावाह्यइंद्रंअग्निंयमंनिर्ऋतिंवरुणंवायुंसोमंईशानं॥तदस्तुमित्रावरुणा०॥गृहाणेतिप्रतिष्ठा०॥संपूज्यतदीशान्यांकलशंसंस्थाप्यपवपूर्णपात्रनिधानांतेतत्रवरुणमावाह्यसंपूज्यकलशप्रार्थनांतेःन्वारभ्यात्॥चक्षुषीआज्येनेत्यंतेनवग्रहमरुदेवताःशिख्यादिपंचचत्वारिंशद्देवताश्चप्रत्येकंप्रतिद्रव्यंअष्टाष्टसंख्याकाभिःऔदुंबरसमित्रुछतिलपायसाज्याहुतिभिः॥वास्तोष्पतइतिचतसृभिर्ऋग्भिःप्रत्यृचमष्टाविंशतिसंख्याकाभिःपूर्वोक्तद्रव्यैःवास्तोष्पतइतिपंचभिर्ऋग्भिःप्रत्यृचमेकैकं

बिल्वैः चरक्यादीन्चतुःसंख्याकाभिःसमिद्भिलपायसाज्याहुतिभिःशेषेण
त्यादिआज्यास्थालीनांतेलौकिकपायसंचरुंचश्रपयेदग्नेरुत्तरतोनिधायतत्र
पवित्रंनिधायप्रोक्षणीजलेनप्रोक्षणरूपसंस्कारंकृत्वाचक्षुष्यंतेअन्वाधा
नक्रमेणहुत्वाबिल्वहोमेवास्तोष्पतइतिचतुर्भिः।वास्तोष्पतेध्रुवास्थूणा
मितिरिरिंविठिर्वास्तोष्पतिर्गृहतीहोमेविनियोगः॥ॐवास्तोष्पतेध्रुवा
स्थूणांसत्रंसोम्यानां॥इषमूर्जमेक्षापुरांशाश्वतीनामिंद्रोमुनीनांसखास्वाहा॥
इतिपंचमंत्रैर्बिल्वानिहुत्वातनश्चरक्यादिभ्योहुत्वास्विष्टकृदादिप्रायश्चि ६

त्तहोमांतेईंद्रादिभ्योनवग्रहेभ्यश्चसदीपमाषभक्तबलीन्दत्वामूर्धानमिति
पूर्णाहुतिंहुत्वाप्रणीतानिनयनादिकर्मशेषंसमाप्यवास्तुमंडलपश्चिमदेशे
ॐशिखिनेनमःएषपायसबलिर्नमम॥१॥एवंसर्वत्र।पर्जन्याय२जयंताय३
कुलिशायुधाय४सूर्यायपसत्यायदृभ्रशाय७आकाशाय८वायवे९पूष्णे१०वि
तथाय११गृहक्षताय१२यमाय१३गंधर्वाय१४भृंगराजाय१५मृगाय१६पित्र
ये१७॥दौवारिकाय१८सुग्रीवाय१९पुष्पदंताय२०वरुणाय२१असुराय२२
शेषाय२३पापाय२४रोगाय२५अहये२६मुख्याय२७भल्लाटाय२८सोमाय२९

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH OF THE

७

सर्पाय३० अदित्यै३१ दित्यै३२ आपाय३३ सावित्राय३४ जयाय३५ रुद्राय३६
अर्यम्णे३७ सवित्रे३८ विवस्वते३९ बिबुधाधिपाय४० मित्राय४१ राजयक्ष्म
णे४२ पृथ्वीधराय४३ अपवत्साय४४ ब्रह्मणेनमः४५॥ होमेपिस्वाहाकारो
तानिज्ञेयानि॥ चरक्यै१ विदार्यै२ पूतनायै३ पापराक्षस्यै४ स्कंदाय५ अर्यम्णे६
जंभकाय७ पिलिपिच्छाय८॥ इंद्राद्यष्टोएवंग्रिरव्यादिभ्यःपायसबलीन्
चरक्यादिभ्योमाषभक्तबलीन्दद्यात्॥ ततआचार्यादयःसमुद्रज्येष्ठाद्या
दिवेदिके॥ सुरास्त्वेत्यादिपोराणैश्चमंत्रैर्यजमानंसपत्नीकंशांतिकलशोद ७

केनापिविच्यसर्वौषधीभिरनुलिप्तंस्नापयेयुः॥ ततआचार्यअगारमध्ये
ब्रह्मस्थानेसुरूपांभूमिंतांस्त्रीरूपांपृथ्वींध्यात्वा॥ ॐधरायैनमःइतिमंत्रेण
प्रपूज्यजपेत्॥ सर्वेदेवमयंवासुरास्तुदेवमयंपरमिति॥ ततोगृहंप्रागादित
स्त्रिरत्र्यापावमानेनसूत्रेणराक्षोघ्नचवेष्टयेच्छनैःछिन्नेसूत्रेशुभंततोदुग्ध अ
पूर्णयासप्तनकुंभ्याजलपूर्णयाचसप्तनकुंभ्यातथैवसक्तद्वयेनधारांद्वय
मविच्छिन्नंकुर्यात्॥ अथयजमानोगृहस्याग्नेयेआकाशपदेजानुदघ्नमवटं
खात्वातंगोमयेनानुलिप्यशुक्लचंदनपुष्पाक्षतादिभिरलंकृत्यशाल्यादिस

सबीजानिदध्योदनंचप्रक्षिप्यनवकुंभंजलपूर्णंशुक्लपुष्पयुतंगंधादिभिर
र्चितंहस्तद्वयेनादायजानुभ्यामवनिंगत्वा॥ॐनमोवरुणायेतितज्जलेनगर्तं
पूरयेत्॥तत्रावर्तेपुष्पेचोर्ध्वमुखंशुभं वैपरीत्येत्वशुभं॥ततोमृन्निर्मितपेटि
कायांससबीजदध्योदनंश्रीवालपुष्पाणिप्रक्षिप्यपूर्वस्थापितवृषवास्तुतुर्यमं
गलघोषेणानीयतस्यांसंस्थाप्यगंधादिभिःसंपूज्यप्रार्थयेन्नह्याद्यां॥पूजि
तोसिमयावास्तोहोमाद्यैरर्चनैःशुभैः॥प्रसीदपाहिविश्वेशदेहिमेगृहजंसु
खं॥वास्तुपुरुषनमस्तेस्तुभूशय्याभिरतप्रभो॥मद्गृहंधनधान्यादिसमृद्धं ८

कुरुसर्वदेति॥ततःपेटिकामाच्छाद्यतस्मिन्नर्तेज्ञानेनिक्षिपेदनेन॥सप्तशैल
सागरांपृथ्वीयथावहसिमूर्धनि॥तथामांवहकल्याणंसंपत्संततिभिःसदेति
गर्तेचतथैवमदापूरितेमदभ्राधिक्येऽत्तमंसाम्येमध्यमंन्यूनेत्वधमंफलंवि
द्यात्॥गर्तोपरिभूमिंगोमयेनोपलिप्यशुक्लचंदनपुष्पाक्षतैर्भूषयेत्॥ततो
ग्नेःपश्चिमतआचार्यंसंपूज्यालंकृतांगांवासोयुगंचदक्षिणांदत्वाब्रह्मा
त्विग्भ्योयथाशक्तिदक्षिणांदत्वाग्रहाणांशिल्पादिवास्तुदेवतानांचपूजां
कृत्वाक्षमाप्य॥उत्तिष्ठब्रह्मणस्पते॥यांतुदेवगणाःसर्वेपूजामादाय

९ पार्थिवी॥इष्टकामप्रसिध्यर्थंपुनरागमनायचेतिविसृज्याचार्यहस्तेप्रतिपा
द्याग्निंसंपूज्यगच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर॥यत्रब्रह्मादयोदे
वास्तत्रगच्छहुताशनेतिविसृज्यब्राह्मणैःशांतिपाठःकार्यइत्यादिग्रहा
दीनांशिरव्यादीनांचप्रीत्यर्थंप्रत्येकंत्रीस्त्रीनेकेकंवायथाशक्तिब्राह्मणा
नभोज्यशिषोगृहीत्वासुहृद्युतोभुंजीत॥एवंप्रथमेऽहिवास्तुशांतिंवि
धायद्वितीयेऽहिगृहप्रवेशंकुर्यात्॥सचेत्थं॥नवंजलपूर्णंसफलंकलश
मंजलिनागृहीत्वायजमानोब्राह्मणान्वितःसदारपुत्रतूर्यघोषेणगृहं ९

१० प्रविश्यप्रधानगृहमध्येधान्योपरितंकलशंस्थापयेत्॥ततोगृहस्थेर्या
र्थंपुण्याहंवाचयित्वाब्राह्मणान्भोजयित्वाशिषोगृहीत्वासुहृद्युतोभुंजीत॥
॥ ॥इतिश्रीप्रतिष्ठानपुरवासीतोरेनारायणात्मजरुद्रदेवकृतेप्रतापना
रसिंहेस्मार्तप्रकाशेपौराणवास्तुशांतिप्रयोगःसमाप्तः॥ ॥संवत१८४३नल
नामेसंवत्सरेशाके१७०७विश्वावसुसंवत्सरेमार्गशीर्षशुद्ध४इंदुवासरेअवंतिकायांपुण्य
स्तंभनिवासीथाल्युपनामकनागेशभट्टात्मजश्रीयभट्टेनलिखितं॥ ॥
॥श्रीः॥ ॥ ॥छ॥ ॥ ॥राम॥ ॥ १०

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥इतिवास्तुशांतिःसमाप्ता॥
॥पत्र १०॥